# Guru Parampara Parichayah

# ગુરુપરમ્પરાપરિચયઃ

## Document Information

Text title : Guru Parampara Parichayah

File name : guruparamparAparichayaH.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Proofread by : Mohan Chettoor

Latest update : January 13, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2023

*sanskritdocuments.org*

# ગુરુપરમ્પરાપરિચયઃ

(વારાણસીસ્થ શ્રીધ્રુવેશ્વરમઠીય ગુરુપરમ્પરાપરિચયઃ)

નારાયણં પદ્મભવં વસિષ્ઠં શક્તિં ચ તત્પુત્રપરાશરઞ્ચ ।
વ્યાસં શુકં ગૌડપદં મહાન્તં ગોવિન્દયોગીન્દ્રમથાસ્ય શિષ્યમ્ ॥ ૧॥

શ્રીશઙ્કરાચાર્યમથાસ્ય પદ્મપાદં ચ હસ્તામલકઞ્ચ શિષ્યમ્ ।
તં તોટકં વાર્તિકકારમન્યાનસ્મદ્ગુરૂન્સન્તતમાનતોઽસ્મિ ॥ ૨॥

વિપ્રાગ્રણીં જોધપુરીયવિપ્રવંશોદ્ભવં માનગિરિં યતીન્દ્રમ્ ।
ધ્રુવેશ્વરસ્થાપકસદ્ગુરોર્ગુરું શ્રિયોઽધિવાસં પ્રથમં પ્રણૌમ્યથા ॥ ૩॥

પાઞ્ચાલભૂદેવકુલોદ્ભવં તં પ્રણૌમ્યથામેધગિરિં દ્વિતીયમ્ ।
ધ્રુવેશ્વરાધીશગુરું યતીન્દ્રં શ્રીભારતીયુગ્મસમાશ્રયઞ્ચ ॥ ૪॥

અથાત્ર કાશ્યાં વિબુધાશ્રયાર્થં ધ્રુવેશ્વરાખ્યં ભવનં ભવસ્ય ।
સંસ્થાપિતં યૈશ્ચ સસાધુવાદં વિદ્યાવિનોદાય સુવિસ્તૃતં તમ્ ॥ ૫॥

પઞ્ચામ્બુદેશીયસુવિપ્રવંશસમુદ્ભવં રામગિરિં તૃતીયમ્ ।
સંસ્થાપકં નૌમિ તપોઽધિવાસં રેવાડિનામાઞ્ચલજાતરત્નમ્ ॥ ૬॥

શ્રીસચ્ચિદાનન્દગિરિં તુરીયં તુરીયવર્ણાશ્રમમણ્ડનઞ્ચ ।
યદ્રાજપુત્રેઽસ્તિ પુરં પ્રસિદ્ધં જયાભિધં તત્ર ધૃતાવતારમ્ ॥ ૭॥

યેનાન્નસત્રાણિ વિનિર્મિતાનિ સપ્તાનિ સત્સેવનતત્પરાણિ ।
સમ્પ્રેરયન્ભક્તવરાન્સ્વકીયાનનન્તજન્મોદિતપુણ્યપુઞ્જાન્ ॥ ૮॥

શિષ્યં હિ તેષામમરેશ્વરાખ્યં ધ્રુવાધિપં પઞ્ચમમાનતોઽસ્મિ ।
શ્રીમન્મનીશાખ્યયતિં ચ ષષ્ઠં પઞ્ચામ્બુવિપ્રાન્વયલબ્ધકાયમ્ ॥ ૯॥

અદ્વૈતવેદાન્તવિલાસભાષ્યકારૈરથાદ્યૈઃ સમધિષ્ઠિતં યત્ ।
નિરઞ્જનં પીઠમનાદિવિદ્યાપ્રકાશબિમ્બં સમધિષ્ઠિતં યત્ ॥ ૧૦॥

યોગીન્દ્રં તમનન્તપાદનિલયે લીનં પ્રણમ્યાદરાત્

પીઠાધીશમથાષ્ટમં યતિવરં શ્રીમન્નૃસિંહં ભજે ॥ ૧૧॥

અદ્વૈતં દુરિતાર્દને દ્વયમપિ પ્રત્યક્ષતો યત્પદં
    સત્યશ્ચાપિ વિમોહચૌર્યચતુરા વાચો યદીયાસ્તથા ।
દત્તાશેષજનાભયોઽપિ નિરતઃ સંસારનિઃશેષણે
    યઃ સોઽયં યતિભૂપતિર્વિજયતે શ્રીમન્નૃસિંહાધિપઃ ॥ ૧૨॥

બાલ્યાદેવ તિરસ્કૃતં ભવસુખં યેનાશ્રિતા બ્રહ્મદૃક્
    યસ્મિન્નિત્યસુખામ્બુધૌ બુધજનાઃ નિત્યં નિમગ્નાઃ સદા ।
કીર્તિર્યસ્ય સુવિસ્તૃતા ધવલિતા ચાનિર્જગન્તાદિહ
    સોઽયન્નઃ પરમો ગુરુર્વિજયતે શ્રીમન્નૃસિંહાધિપઃ ॥ ૧૩॥

કાલિન્દ્યાઃ પુલિને વિશાલભવને પ્રોત્તુઙ્ગશૃઙ્ગાઙ્કિતે
    યસ્મિન્નાદનિબદ્ધયન્ત્રઘટિકા વૈતાલિકો રાજતે ।
વિદ્યાદાનપરાયણૈર્યતિવરૈઃ શ્રીમન્નૃસિંહાભિધૈઃ
    વિદ્યાપીઠમધિષ્ઠિતં સુલલિતં શ્રીવિશ્વનાથાહ્વયમ્ ॥ ૧૪॥

યાસ્મિન્સૌરભપૂરિતા સુફલદા રમ્યા શુભા વાટિકા
    વિશ્રામાર્થવિનિર્મિતા કુસુમિતા ભૃત્યૈઃ સદા સેવિતા ।
વિદ્યાપાઠપરાયણા વટુવરાસ્તસ્મિન્વસન્તોઽવ્યયાં
    વિદ્યામાકલયન્તિ હે બહુવિધાં ધર્માર્થમોક્ષપ્રદામ્ ॥ ૧૫॥

મધ્યે વર્તુલવેષ્ટિતો હ્યુપવને વિશ્રામકાર્યાલય-
    સ્તસ્યાગ્રે ચ વિશાલયજ્ઞભવનં યન્નિર્મિતં નૂતનમ્ ।
છાત્રાશ્ચાત્ર સદા ચરિત્રવિષયેઽચિન્ત્યચ્ચયચ્ચેતસિ
    લોકાચારવિચારચારુચપલાશ્ચિન્વન્તિ ચિન્મઙ્ગલાઃ ॥ ૧૬॥

તત્રારાચ્ચ વિનિર્મિતઃ સુલલિતઃ શ્રીવિશ્વનાથાલયઃ
    સંન્યાસાશ્રમનામકઞ્ચ ભવનં ધર્માર્થિભિર્નિર્મિતમ્ ।
સાયમ્પ્રાતરખણ્ડશાસ્ત્રવિષયે યસ્મિન્ રતાઃ સજ્જનાઃ
    શ્રુત્વા શ્રૌતવચશ્ચતુર્થફલદં સાધ્યં ફલં યાન્તિ તે ॥ ૧૭॥

દેહલ્યામિતિસર્વસંસ્કૃતમહાવિદ્યાલયો નાઽપરઃ
    એવન્નાપરમસ્તિ સાધનયુતં સ્થાનં ક્વચિચ્છોભનમ્ ।
શ્રીવિદ્યાયુગલં હિ યત્ર રમતે શશ્વત્સુશઙ્કારકં
    યસ્યાઽયં સુનિરીક્ષકો વિજયતે શ્રીમન્નૃસિંહેશ્વરઃ ॥ ૧૮॥

કાશ્યામપ્યતિવિસ્તૃતં બુધવરૈઃ સંસેવિતં સાદરં
વિદ્યાપીઠમધિષ્ઠિતઞ્ચ સુખદં ગ્રન્થાલયો નૂતનઃ ।
દિવ્યં યત્ર વિરાજતે હ્યુપવનં દેવાલયઞ્ચાદિમં
યસ્મિન્વિશ્વગુરુર્ભવો વિજયતે શ્રીદક્ષિણામૂર્તિભૃત્ ॥ ૧૯ ॥

આસીત્પૂર્વમિદં સુજીર્ણમભિતો ધ્વંસાવશેષાચિતં
યત્રેદં ભવનં નવં વિરચિતં યત્નૈશ્ચ યેનાત્મનઃ ।
રક્ષાર્થં હિ સમર્પિતં બહુધનં સદ્ભક્તવૃન્દાર્પિતં
સોઽયન્નઃ પરમો ગુરુર્વિજયતે પીઠાધિપશ્ચાષ્ટમઃ ॥ ૨૦ ॥

યં ભક્તાઃ સમુપાસતે સુમનસા સ્વાભીષ્ટસંસિદ્ધયે
સ્વાત્માનન્દવિવૃદ્ધયેઽપિ યમિનો વૈરાગ્યરાગાન્વિતાઃ ।
સચ્છાસ્ત્રામ્બુધિપારગા અપિ સદા સ્તુન્વન્તિ યં સાદરં
વન્દેઽહં તમખણ્ડબોધવિભવં શ્રીમન્નૃસિંહ ગુરુમ્ ॥ ૨૧ ॥

રામાનન્દગિરિં ગિરન્તમનિશં બ્રાહ્મીં ગિરં સાદરં
વિદ્યાધીશ્વરમુત્તરાપથધરાવિપ્રાત્મજં સપ્તમમ્ ।
રાજસ્થાનધરામરાન્વયભવઃ શ્રીમન્મહેશાધિપઃ
પીઠાધીશ્વરચક્રવર્ત્યનુપમઃ સંરક્ષકો રાજતે ।
જ્ઞાનં યસ્ય નવાનવં સુવિમલં વૈદેશિકં દૈશિકં
મર્ત્યાનાં પ્રહિનસ્તિ દર્પભરિતં હ્યજ્ઞાનમેકાન્તતઃ ॥ ૨૨ ॥

યેષાઞ્ચામૃતપૂરિતાં મૃદુગિરાં શ્રુત્વૈવ મુક્તિપ્રદાં
મુઞ્ચન્તો ભવબન્ધનં મુનિપથં પ્રાયાન્તિં ભક્તાભૃશમ્ ।
તેષાં સજ્જનચેતસાં શ્રુતિવિદાં સમ્પ્રાપ્ય સંરક્ષણં
વિશ્વાસઃ ખલુ નઃ સમુન્નતિપદં પ્રાપ્સ્યન્તિ પીઠાદયઃ ॥ ૨૩ ॥

ભાલે યસ્ય સુશોભિતં સુભસિતં તાપાપહં ચન્દનં
વસ્વાધિક્યશતં ગલે વિલુલિતં રુદ્રાક્ષમાલ્યં સદા ।
કૌશેયશ્ચ ય સુપ્રભાસિતમતો બાલાર્કકાન્તં વપુ-
સ્તં વન્દે નવમં નિરઞ્જનપતિં શ્રીમન્મહેશાધિપમ્ ॥ ૨૪ ॥

ત્યક્ત્વા દુઃખાવલોઢં ભવવિભવમુખં શૈશવાદેવપૂર્ણં
યૈરાચારૈઃ સ્વકીયૈરથ સુજનમનસ્તોષપોષૌ જુષાણમ્ ।
દિવ્યં વિજ્ઞાનમાધ્યાત્મિકમખિલસુખાભાસમૂલં હ્યધીતં
તં કૃષ્ણાનન્દપાદં વયમભિનવમાચાર્યવર્યં ભજામઃ ॥ ૨૫ ॥

નાનાવિદ્યાનિવાસં નવયુગયુવકોત્સાહવાદસ્વભાવં
    શ્રૌતસ્માર્તાદિકર્મસ્વવિરતનિરતં બ્રહ્મવિદ્યાવિલાસમ્ ।
નિત્યં ગીર્વાણવાણીવિપિનહૃતસુધાસૌરભાપૂરિતાસ્યં
    કૃષ્ણાનન્દં ગિરિં તં વયમભિનવમાચાર્યવર્યં નમામઃ ॥ ૨૬॥

યદીયવાનિર્ઝરિણી સમુજ્ઝયત્યુપેતચેતઃ કલુષાણ્યશેષતઃ ।
તમઃ સમુદ્ધ્ય દદાતુ સદ્ધિયં નૃસિંહસંજ્ઞો યતિવાસવઃ સ વઃ ॥ ૨૭॥

ઇતિ ગુરુપરમ્પરાપરિચયઃ સપૂર્ણઃ ।

Proofread by Mohan Chettoor

---

*Guru Parampara Parichayah*

pdf was typeset on January 14, 2023

Please send corrections to *sanskrit@cheerful.com*